Prajnaparamitas. Satasahastrika
Satasahastrika prajnaparamita

UNIVERSITY OF TORONTO DUPL
3 1761 00379911 1

BL
1411
P7S3
1902
pt.1
fasc.18

Part - 1

XVIII

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1378.

शतसाहस्रिका प्रज्ञापारमिता ।

ÇATASĀHASRIKĀ-PRAJÑĀ-PĀRAMITĀ:


A

THEOLOGICAL AND PHILOSOPHICAL DISCOURSE

OF

BUDDHA WITH HIS DISCIPLES

(IN A HUNDRED-THOUSAND STANZAS).



BL
1411
P7S3
1902
pt. 1
fasc. 18

LIBRARY
APR 16 1969
UNIVERSITY OF TORONTO

EDITED BY

PRATĀPACANDRA GHOṢA

PART I. FAS. XVIII.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET.
1913.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

Asiatic Society of Bengal,

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agents—

Mr. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, London,*
and Mr. OTTO HARRASSOWITZ, Bookseller, *Leipzig, Germany.*

*Complete copies of those works marked with an asterisk * cannot be supplied—of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each ... Rs. 1
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each 14
Aitareyalocana 2
Amarakosha, Fasc. 1-2 4
Anumana Didhiti Prasarini, Fasc. 1-3 @ /10/ 1
Aṣtasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each ... 3
Ātmatattvaviveka, Fasc. I 0
Açvavaidyaka, Fasc. 1-5 @ /10/ each 3
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. 1, Fasc. 1-10. Vol. II, Fasc. 1-11 @ 1/ each 21
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol. II, Fasc. 1, @ /10/ each ... 1
Baudhāyana Srauta Sūtra, Fasc. 1-3; Vol. II, Fasc. 1-5 @ /10/ each 5
Bhasavritty 0
Bhāṭṭa Dīpikā, Vol. I, Fasc. 1-6; Vol. II, Fasc. 1-2 @ /10/ each ... 5
Bauddhastotrasangraha 2
Brhaddevatā, Fasc. 1-4 @ /10/ each 2
Bṛhaddharma Purāṇa, Fasc. 1-6 @ /10/ each 3
Bodhicaryāvatāra of Çāntideva, Fasc. 1-6 @ /10/ each ... 3
Cri Cantinatha Charita, Fasc. 1-3 1
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each 1
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ... 8
*Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-7; Vol. V, Fasc. 1-4 @ /10/ each ... 14
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each 3
Ditto Vol. VII, Fasc. 1-5 @ /10/ 3
Ditto Vol. IX, Fasc. 1-2 1
Çatasāhasrikā-prajñāpāramitā, Part I, Fasc. 1-17 @ /10/ each ... 10
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III, Part I, Fasc. 1-18, Part II, Fasc. 1-10; Vol. IV, Fasc. 1-6 @ /10/ each 36
Ditto Vol. IV, Fasc. 7, @ 1/4/ each ... 1
Ditto Vol. IV, Fasc. 8-10 @ /10/ 1
Çlokavartika (English), Fasc. 1-7 @ 1/4/ each 8
*Çrauta Sūtra of Çānkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4; Vol. 4, Fasc. 1 @ /10/ each ... 10
Çrī Bhāshyam, Fasc. 1-3 @ /10/ each 1
Dāna Kriyā Kaumudi, Fasc. 1-2 @ /10/ each 1
Gadadhara Paddhati Kālasāra, Vol. 1, Fasc. 1-7 @ /10/ each ... 4
Ditto Ācārasāra, Vol. II, Fasc. 1-4 3
Gobhilīya Grhya Sūtra, Vol. I, @ /10/ each 3
Ditto Vol. II, Fasc. 1-2 @ 1/4 /each ... 2
Ditto (Appendix) Gobhila Parisista 2
Ditto Grihya Sangraha 0
Haralata 1
Karmapradiph, Fasc. 1 1
Kāla Viveka, Fasc. 1-7 @ /10/ each .. .. [illegible]
Kātantra, Fasc. 1-6 @ /12/ each 4
Kavi Kalpa Lata, Fasc. 1 ... ... [illegible]
Kavindravacana Samuccayah ... ... [illegible]
Kurma Purana, Fasc. 1—9 @ /10/ each ... ... [illegible]
Kiranavali, Fasc. 1-3, @ /10/ 1
Madana Pārijāta, Fasc. 1-11 @ /10/ each ... ... [illegible]
Mahā-bhāsya-pradīpodyota, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12; Vol. III, Fasc. 1-10 @ /10/ each 9
Ditto Vol. IV, Fasc. 1-3 @ 1/4 each 3

अपरान्ततश्चत्वारि वैशारद्यानि नोपलभ्यन्ते। प्रत्युत्पन्नतश्चत्वारि वैशारद्यानि नोपलभ्यन्ते। अध्वसमतायां चत्वारि वैशारद्यानि नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नाऽनागतोऽध्वान प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते चतस्रः प्रतिसम्बिदो नोपलभ्यन्ते। अपरान्ततश्चतस्रः प्रतिसम्बिदो नोपलभ्यन्ते। प्रत्युत्पन्नतश्चतस्रः प्रतिसम्बिदो नोपलभ्यन्ते। अध्वसमतायां चतस्रः प्रतिसम्बिदो नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नाऽनागतोऽध्वान प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते महाकरुणा नोपलभ्यते। अपरान्ततो महाकरुणा नोपलभ्यते। प्रत्युत्पन्नतो महाकरुणा नोपलभ्यते। अध्वसमतायां महाकरुणा नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नाऽनागतोऽध्वान प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते अष्टादशावेणिकाबुद्धधर्म्मा नोपलभ्यन्ते। अपरान्ततोऽष्टादशावेणिकाबुद्धधर्म्मा नोपलभ्यन्ते। प्रत्युत्पन्नतोऽष्टादशावेणिकाबुद्धधर्म्मा नोपलभ्यन्ते। अध्वसमतायामष्टादशावेणिकाबुद्धधर्म्मा नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यन्ते। नानागतो न प्रत्युत्पन्नोऽध्वोपलभ्यते।

समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समताया-मतीतोऽध्वोपलभ्यते । कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नो-ऽध्वोपलभ्यते ।

पुनरपरं सुभूते पूर्व्वान्ततः पृथग्जनो नोपलभ्यते। अपरा-न्ततः पृथग्जनो नोपलभ्यते। प्रत्युत्पन्नतः पृथग्जनो नोपलभ्यते। त्र्यध्वसमतायां पृथग्जनो नोपलभ्यते। तत्कस्य हेतोः सत्त्वाऽनुप-लब्धितामुपादाय। पुनरपरं सुभूते पूर्व्वान्ततः श्रावको नोप-लभ्यते। अपरान्ततः श्रावको नोपलभ्यते। प्रत्युत्पन्नतः श्रावको नोपलभ्यते। त्र्यध्वसमतायां श्रावको नोपलभ्यते। तत्कस्य हेतोः सत्त्वाऽनुपलब्धितामुपादाय। पुनरपरं सुभूते पूर्व्वान्ततः प्रत्येक-बुद्धो नोपलभ्यते। अपरान्ततः प्रत्येकबुद्धो नोपलभ्यते। प्रत्युत्प-न्नतः प्रत्येकबुद्धो नोपलभ्यते। त्र्यध्वसमतायां प्रत्येकबुद्धो नोप-लभ्यते। तत्कस्य हेतोः सत्त्वानुपलब्धितामुपादाय। पुनरपरं सुभूते पूर्व्वान्ततो बोधिसत्त्वो नोपलभ्यते। अपरान्ततो बोधिसत्त्वो नोप-लभ्यते। प्रत्युत्पन्नतो बोधिसत्त्वो नोपलभ्यते। त्र्यध्वसमतायां बोधिसत्त्वो नोपलभ्यते। तत्कस्य हेतोः सत्त्वानुपलब्धितामुपा-दाय। पुनरपरं सुभूते पूर्व्वान्ततस्तथागतो नोपलभ्यते। अपरा-न्ततस्तथागतो नोपलभ्यते। प्रत्युत्पन्नतस्तथागतो नोपलभ्यते। त्र्यध्वसमतायां तथागतो नोपलभ्यते। तत्कस्य हेतोः सत्त्वानुप-लब्धितामुपादाय। एवं खलु बोधिसत्त्वेन महासत्त्वेन प्रज्ञापार-मितायां स्थित्वा त्रिष्वध्वसु शिक्षित्वा सर्व्वाकारज्ञता परिपूरयि-तव्या। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य त्र्यध्वसमतानाम-

महायानं। यत्र स्थित्वा बोधिसत्त्वो महासत्त्वः सदेवमानुषासुरं लोकमभिभूय सर्व्वाकारज्ञतायां निर्याति ।

अथ खल्वायुष्मान् सुभूतिर्भगवन्तमेतदवोचत् । साधु साधु-भगवन् यावत् सुभाषितमिदं भगवता बोधिसत्त्वानां महासत्त्वानां त्र्यध्वसमतानाममहायानं। अत्र भगवन् महायाने शिक्षित्वाऽतीतै-रपि बोधिसत्त्वैर्म्महासत्त्वैः सर्व्वाकारज्ञता समनुप्राप्ता। अनागता अपि भगवन् बोधिसत्त्वा महासत्त्वा अत्रैव महायाने शिक्षित्वा सर्व्वाकारज्ञता मनुप्राप्स्यन्ति। येऽपि ते भगवन्नेतर्हि दशसु दिक्षु अप्रमेयासंख्येयेषु लोकधातुष्वपरिमाणा बोधिसत्त्वा महासत्त्वा-स्तेऽप्यत्रमहायाने शिक्षित्वा सर्व्वाकारज्ञतामनुप्राप्नुवन्ति। तस्मात्तर्हि भगवन् महायानमिदं बोधिसत्त्वानां महासत्त्वानां यदुत त्र्यध्व-समतानाम। एवमुक्ते भगवानायुष्मन्तं सुभूतिमेतदवोचत्। एव-मेतत् सुभूते एवमेतत्। अत्र महायाने शिक्षित्वाऽतीतानागत-प्रत्युत्पन्नैस्तथागतैरर्हद्भिः सम्यक्सम्बुद्धैः सर्व्वाकारज्ञताऽनुप्राप्ता चानु-प्राप्स्यते चानुप्राप्यते च ॥ ० ॥

शतसाहस्र्याः प्रज्ञापारमितायाः एकादशपरिवर्त्तः ॥ ० ॥

अथ द्वादशः परिवर्त्तः।

अथ खलु पूर्णो मैत्रायणीपुत्रो भगवन्तमेतदवोचत्। अयं भगवन् सुभूतिः स्थविरस्तथागतेनार्हता सम्यक्सम्बुद्धेन प्रज्ञापारमितायाः कृते अध्येषितः स महायानमुपदेष्टव्यमन्यते। अथायुष्मान् सुभूतिर्भगवन्तमेतदवोचत्। माहैवाहं भगवन् प्रज्ञापारमितामतिक्रम्यमहायानमुपदिशामि। भगवानाह। नोहीदं सुभूतेऽनुलोमं त्वं सुभूते प्रज्ञापारमितायां महायानमुपदिश्यसि। तत्कस्य हेतोस्तथाहि सुभूते ये केचित् कुशला धर्म्माः श्रावकधर्म्मा वा प्रत्येकबुद्धधर्म्मा वा बोधिसत्त्वधर्म्मा वा बुद्धधर्म्मा वा सर्व्वे ते प्रज्ञापारमितायां संग्रहं समवसरणं गच्छन्ति। सुभूतिराह। कतमे भगवन् कुशलाधर्म्मा बोधिपक्षाः वा के धर्म्माश्च प्रत्येकबुद्धधर्म्माश्च बोधिसत्त्वधर्म्माश्च बुद्धधर्म्माश्च ये प्रज्ञापारमितायां संग्रहं समवसरणं गच्छन्ति। भगवानाह। तद्यथा चत्वारि स्मृत्युपस्थानानि। चत्वारि सम्यक्प्रहाणानि। चत्वार ऋद्धिपादाः। पञ्चेन्द्रियाणि। पञ्चबलानि। सप्तबोध्यङ्गानि। आर्य्याष्टाङ्गोमार्गः। चत्वार्य्यार्य्यसत्यानि। शून्यतानिमित्ताप्रणिहित विमोक्षमुखानि। चत्वारि ध्यानानि। चत्वार्य्यप्रमाणानि। चतस्र आरूप्य समापत्तयः। षड़भिज्ञाः। दानपारमिता। शीलपारमिता। क्षान्तिपारमिता। वीर्य्यपारमिता। ध्यानपारमिता। प्रज्ञापारमिता। अध्यात्मशून्यता। बहिर्द्धाशून्यता। अध्यात्मबहिर्द्धाशून्यता। शून्यता-

शून्यता। महाशून्यता। परमार्थशून्यता। संस्कृतशून्यता। असंस्कृतशून्यता। अत्यन्तशून्यता। अनवराग्रशून्यता। अनवकारशून्यता। प्रकृतिशून्यता। सर्व्वधर्म्मशून्यता। स्वलक्षणशून्यता। अनुपलम्भशून्यता। अभावशून्यता। स्वभावशून्यता। अभावस्वभावशून्यता। सर्व्वसमाधयः। सर्व्वधारणीमुखानि। दशतथागतबलानि। चत्वारि वैशारद्यानि। चतस्रः प्रतिसम्विदः। महामैत्री। महाकरुणा। महामुदिता। महोपेक्षा। अष्टादशावेणिकाबुद्धधर्म्माः। असंप्रमोषधर्म्मता। महोपेक्षाविहारिता। इमे सुभूते कुशलाधर्म्मा बोधिपक्षाः। श्रावकधर्म्माश्च प्रत्येकबुद्धधर्म्माश्च बोधिसत्त्वधर्म्माश्च बुद्धधर्म्माश्च ये प्रज्ञापारमितायां संग्रहं समवसरणं गच्छन्ति। यच्च सुभूते महायानं यच्च प्रज्ञापारमिता ध्यानपारमिता वीर्य्यपारमिता क्षान्तिपारमिता शीलपारमिता दानपारमिता। यच्च रूपं या च वेदना या च संज्ञा ये च संस्काराः यच्च विज्ञानं यच्च चक्षुः यच्च रूपं यच्च चक्षुर्व्विज्ञानं यश्च चक्षुःसंस्पर्शो या च चक्षुःसंस्पर्शप्रत्ययवेदना। यच्च श्रोत्रं यश्च शब्दो यच्च श्रोत्रविज्ञानं यश्च श्रोत्रसंस्पर्शो या च श्रोत्रसंस्पर्शप्रत्ययवेदना। यच्च घ्राणं यश्च गन्धो यच्च घ्राणविज्ञानं यश्च घ्राणसंस्पर्शो या च घ्राणसंस्पर्शप्रत्ययवेदना। या च जिह्वा यश्च रसो यच्च जिह्वाविज्ञानं यश्च जिह्वासंस्पर्शो या च जिह्वासंस्पर्शप्रत्ययवेदना। यश्च कायो यश्च स्पर्शो यच्च कायविज्ञानं यश्च कायसंस्पर्शो या च कायसंस्पर्शप्रत्ययवेदना। यच्च मनो ये च धर्म्मा यच्च मनोविज्ञानं यश्च मनःसंस्पर्शो या च मनःसंस्पर्शप्रत्ययवेदना। या चाविद्या ये च संस्कारा यच्च विज्ञानं यच्च

नामरूपं यच्च षड़ायतनं यश्च स्पर्शो या च वेदना या च तृष्णा यच्चोपादानं यश्च भवो या च जातिर्यच्च जरामरणं। या च दान-पारमिता या च शीलपारमिता या च क्षान्तिपारमिता या च वीर्य्यपारमिता या च ध्यानपारमिता या च प्रज्ञापारमिता। या चाऽध्यात्मशून्यता या च बहिर्द्धाशून्यता या चाऽध्यात्मबहिर्द्धाशून्यता या च शून्यताशून्यता या च महाशून्यता या च परमार्थशून्यता या च संस्कृतशून्यता या चाऽसंस्कृतशून्यता या चाऽत्यन्तशून्यता या चाऽनवराग्रशून्यता या चाऽनवकारशून्यता या च प्रकृतिशून्यता या च सर्व्वधर्म्मशून्यता या च स्वलक्षणशून्यता या चाऽनुपलम्भशून्यता या चाऽभावशून्यता या च स्वभावशून्यता या चाऽभावस्वभावशून्यता। यानि च स्मृत्युपस्थानानि या नि च सम्यक्प्रहाणानि। ये चर्द्धि-पादाः। यानि चेन्द्रियाणि यानि च बलानि यानि च बोध्य-ङ्गानि यश्चार्य्याष्टाङ्गोमार्गः। यानि चार्य्यसत्यानि यानि च ध्यानानि यानि चाप्रमाणानि याश्चारूप्यसमापत्तयो याश्च षड़-भिज्ञाः। यानि चाष्टाभिभ्वायतनानि। यानि दशकृत्स्नायतनानि। येचाष्टौ विमोक्षाः। याश्च नवाऽनुपूर्व्वविहारसमापत्तयः। यच्च दुःखं यश्च समुदयो यश्च निरोधो यश्च मार्गः। यानि च शून्य-तानिमित्ताप्रणिहित विमोक्षमुखानि। ये च समाधयो यानि च धारणीमुखानि यानि च दश तथागतबलानि। यानि च चत्वारि वैशारद्यानि। याश्च चतस्रः प्रतिसम्बिदो या च महाकरुणा ये चा-ष्टादशावेणिकाबुद्धधर्म्माः। यश्च कामधातुर्यश्चारूप्यधातुर्ये च कुशल-धर्म्माः ये च साश्रवाधर्म्माः ये चानाश्रवाधर्म्माः ये च लौकिकाधर्म्माः

ये च लोकोत्तराधर्म्माः ये च संस्कृतधर्म्माः ये चाऽसंस्कृतधर्म्माः यश्च तथागतधर्म्मः। यश्च तथागतेन प्रवेदितो धर्म्मविनयो यश्च धर्म्मधातुर्या च तथता या च भूतकोटि यश्चाचिन्त्योधातुर्यश्च निर्व्वाणधातुः सर्व्वेत्र एते धर्म्माः न संयुक्ता न विसंयुक्ताः। अरूपिणोऽनिदर्शना अप्रतिघा एकलक्षणा यदुता अलक्षणाः। अनेन त्वं सुभूते पर्य्यायेण प्रज्ञापारमिताया अनुलोमं महायानसुपदिशसि। तत्कस्य हेतोर्न हि सुभूतेऽन्यन्महायानमन्या प्रज्ञापारमिता। इति हि महायानस्य प्रज्ञापारमिता चाद्वयमेतदद्वैधीकारं। नान्यन्महायानमन्या ध्यानपारमिता। इति हि महायानस्य प्रज्ञापारमिता चाद्वयमेतदद्वैधीकारं। नान्यन्महायानमन्या वीर्य्यपारमिता। इति हि महायानस्य वीर्य्यपारमिता चाद्वयमेतदद्वैधीकारं। नान्यन्महायानमन्या क्षान्तिपारमिता। इति हि महायानस्य क्षान्तिपारमिता चाद्वयमेतदद्वैधीकारं। नान्यन्महायानमन्या शीलपारमिता। इति हि महायानस्य शीलपारमिता चाद्वयमेतदद्वैधीकारं। नान्यन्महायानमन्या दानपारमिता। इति हि महायानस्य दानपारमिता चाद्वयमेतदद्वैधीकारं। नान्यन्महायानमन्याऽध्यात्मशून्यता। इति हि महायानस्याध्यात्मशून्यता चाद्वयमेतदद्वैधीकारं। नान्यन्महायानमन्या बहिर्द्धाशून्यता। इति हि महायानस्य बहिर्द्धाशून्यता चाद्वयमेतदद्वैधीकारं। नान्यन्महायानमन्याऽध्यात्मबहिर्द्धाशून्यता। इति हि महायानस्याध्यात्मबहिर्द्धाशून्यता चाद्वयमेतदद्वैधीकारं। नान्यन्महायानमन्या शून्यताशून्यता। इति हि महायानस्य शून्यताशून्यता चाद्वयमेतदद्वैधीकारं। नान्यन्महायान-

मन्या महाशून्यता । इति हि महायानञ्च महाशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानं नान्यापरमार्थशून्यता । इति हि महायानञ्च परमार्थशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानं मन्या संस्कृतशून्यता । इति हि महायानञ्च संस्कृतशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानमन्याऽसंस्कृतशून्यता । इति हि महायानञ्चासंस्कृतशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानमन्याऽत्यन्तशून्यता । इति हि महायानञ्चात्यन्तशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानमन्याऽनवराग्रशून्यता । इति हि महायानञ्चानवराग्रशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानमन्याऽनवकारशून्यता । इति हि महायानञ्चानवकारशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानमन्या प्रकृतिशून्यता । इति हि महायानञ्च प्रकृतिशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानमन्या सर्व्वधर्म्मशून्यता । इति हि महायानञ्च सर्व्वधर्म्मशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानमन्या स्वलक्षणशून्यता । इति हि महायानञ्च स्वलक्षणशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानमन्याऽनुपलम्भशून्यता । इति हि महायानञ्चानुपलम्भशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानमन्याऽभावशून्यता । इति हि महायानञ्चाभावशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानं नान्यास्वभावशून्यता । इति हि महायानञ्च स्वभावशून्यता चाद्वयमेतद्द्वैधीकारं । नान्यन्महायानमन्याऽभावस्वभावशून्यता । इति हि महायानञ्चाभावस्वभावशून्यता चाद्वयमेतद्द्वैधीकारं ।

नान्यन्महायानमन्यानि स्मृत्युपस्थानानि । इति हि महायानञ्च

स्मृत्युपस्थानानि चाद्वयमेतदद्वैधीकारं । नान्यन्महायानमन्यानि
सम्यक्प्रहाणानि । इति हि महायानस्य सम्यक्प्रहाणानि चाद्वय-
मेतदद्वैधीकारं । नान्यन्महायानमन्ये ऋद्धिपादाः । इति हि
महायानस्यर्द्धिपादाश्चाद्वयमेतदद्वैधीकारं । नान्यन्महायानमन्या-
नीन्द्रियाणि । इति हि महायानस्येन्द्रियाणि चाद्वयमेतदद्वैधी-
कारं । नान्यन्महायानमन्यानि बलानि । इति हि महायानस्य
बलानि चाद्वयमेतदद्वैधीकारं । नान्यन्महायानमन्यानि बोध्य-
ङ्गानि । इति हि महायानस्य बोध्यङ्गानि चाद्वयमेतदद्वैधीकारं ।
नान्यन्महायानमन्य आर्य्याष्टाङ्गमार्गः । इति हि महायानस्या-
र्य्याष्टाङ्गमार्गश्चाद्वयमेतदद्वैधीकारं । नान्यन्महायानमन्यान्यार्य्यस-
त्यानि । इति हि महायानस्यार्य्यसत्यानि चाद्वयमेतदद्वैधीकारं ।
नान्यन्महायानमन्यानि ध्यानानि । इति हि महायानस्य ध्यानानि
चाद्वयमेतदद्वैधीकारं । नान्यन्महायानमन्यान्यप्रमाणानि । इति हि
महायानस्याप्रमाणानि चाद्वयमेतदद्वैधीकारं । नान्यन्महायानमन्या
आरूप्यसमापत्तयः । इति हि महायानस्यारूप्य समापत्तयश्चाद्वय-
मेतदद्वैधीकारं । नान्यन्महायानमन्येऽष्टौ विमोक्षाः । इति हि
महायानस्य विमोक्षाश्चाद्वयमेतदद्वैधीकारं । नान्यन्महायानमन्या
नवानुपूर्व्वविहारसमापत्तयः । इति हि महायानस्यानुपूर्व्वविहार-
समापत्तयश्चाद्वयमेतदद्वैधीकारं । नान्यन्महायानमन्यानि शून्यता-
निमित्ताप्रणिहितविमोक्षमुखानि । इति हि महायानस्य शून्यता-
निमित्ताप्रणिहितविमोक्षमुखानि चाद्वयमेतदद्वैधीकारं । नान्य-
न्महायानमन्या अभिज्ञा । इति हि महायानस्याभिज्ञाश्चाद्वयमेत-

दद्वैधीकारं। नान्यन्महायानमन्ये समाधयः। इति हि महायानञ्च समाधयश्चाद्वयमेतदद्वैधीकारं। नान्यन्महायानमन्यानि धारणी-मुखानि। इति हि महायानञ्च धारणीमुखानि चाद्वयमेतदद्वैधी-कारं। नान्यन्महायानमन्यानि दश तथागतबलानि। इति हि महायानञ्च तथागतबलानि चाद्वयमेतदद्वैधीकारं। नान्यन्महा-यानमन्यानि वैशारद्यानि। इति हि महायानञ्च वैशारद्यानि चाद्वयमेतदद्वैधीकारं। नान्यन्महायानमन्याश्चतस्रः प्रतिसम्विदः। इति हि महायानञ्च प्रतिसम्वितश्चाद्वयमेतदद्वैधीकारं। नान्य-न्महायानमन्या महाकरुणा। इति हि महायानञ्च महा-करुणा चाद्वयमेतदद्वैधीकारं। नान्यन्महायानमन्येऽष्टादशावेणिका-बुद्धधर्म्माः। इति हि महायानञ्चावेणिकबुद्धधर्म्माश्चाद्वयमेत-दद्वैधीकारं।

अनेन सुभूते पर्य्यायेण महायानमुपदिश्य प्रज्ञापारमितोप-दिष्टा भवति। प्रज्ञापारमितामुपदिश्य महायानमुपदिष्टं भवति। अथायुष्मान् सुभूतिर्भगवन्तमेतदवोचत्। अपि तु खलु पुनर्भगवन् पूर्व्वान्ततो बोधिसत्त्वो नोपलभ्यते। अपरान्ततो बोधिसत्त्वो नोप-लभ्यते। मध्यतोऽपि बोधिसत्त्वो नोपलभ्यते। रूपापर्य्यन्ततया बोधिसत्त्वापर्य्यन्तता वेदितव्या। वेदनाऽपर्य्यन्ततया बोधिसत्त्वा-पर्य्यन्तता वेदितव्या। संज्ञापर्य्यन्ततया बोधिसत्त्वापर्य्यन्तता वेदि-तव्या। संस्कारापर्य्यन्ततया बोधिसत्त्वापर्य्यन्तता वेदितव्या। विज्ञा-नापर्य्यन्ततया बोधिसत्त्वापर्य्यन्तता वेदितव्या। रूपं बोधिसत्त्व इत्येवमपि न संविद्यते नोपलभ्यते। वेदना बोधिसत्त्व इत्येवमपि

न संविद्यते नोपलभ्यते। संज्ञा बोधिसत्त्व इत्येवमपि न संविद्यते नोपलभ्यते। संस्कारा बोधिसत्त्व इत्येवमपि न संविद्यते नोपलभ्यते। विज्ञानं बोधिसत्त्व इत्येवमपि न संविद्यते नोपलभ्यते। एवमहं भगवन् सर्व्वेण सर्व्वं सर्व्वथा सर्व्वं बोधिसत्त्वमसमनुपश्यन्ननुपलम्भमानः कतमं बोधिसत्त्वं कतमस्यां प्रज्ञापारमितायामववदिष्याम्यनुशासिष्यामि। बोधिसत्त्वमेव तावत् सकलं न समनुपश्यामि नोपलभे। तत् कतमं बोधिसत्त्वं कतमस्यां प्रज्ञापारमितायामववदिष्याम्यनुशासिष्यामि। बोधिसत्त्वो महासत्त्व इति भगवन्नुच्यते नाममात्रमेतत्। यथा आत्मेति भगवन्नुच्यतेऽत्यन्तानभिनिर्वृत्तश्चात्मा। एवमेव भगवन् बोधिसत्त्वो महासत्त्व इत्युच्यतेऽत्यन्ताऽनभिनिर्वृत्तश्च बोधिसत्त्वः। एवमभावस्वभावानां धर्म्माणां कतमत्तद्रूपं यदनभिनिर्वृत्तं। कतमा सा वेदनायाऽनभिनिर्वृत्ता। कतमा सा संज्ञायाऽनभिनिर्वृत्ता। कतमेते संस्कारा येऽनभिनिर्वृत्ताः। कतमत्तद्विज्ञानं यदनभिनिर्वृत्तं। यच्च भगवन्ननभिनिर्वृत्तं। न तद्रूपं या चानभिनिर्वृत्ता न सा वेदना। या चानभिनिर्वृत्ता न सा संज्ञा। ये चानभिनिर्वृत्ता न ते संस्काराः। यदनभिनिर्वृत्तं न तद्विज्ञानं। तत् किमनभिनिर्वृत्तमनभिनिर्वृत्तायां प्रज्ञापारमितायामववदिष्याम्यनुशासिष्यामि। न चान्यत्रानभिनिर्वृत्तो बोधिसत्त्वो महासत्त्व उपलभ्यते। यो बोधाय चरेत्। स चेदेवं निर्दिश्यमाने बोधिसत्त्वस्य महासत्त्वस्य चित्तं नावलीयते न संलीयते न विप्रतिसारी भवति मानसं नोत्त्रस्यति न संत्रस्यति न संत्रासमापद्यते। चरत्ययं बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां।

अथायुष्मान् शारद्वतीपुत्र आयुष्मन्तं सुभूतिमेतदवोचत्। केन कारणेनायुष्मन् सुभूते पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अपरान्ततो बोधिसत्त्वो नोपैति मध्यतो बोधिसत्त्वो नोपैति। केन कारणेनायुष्मन् सुभूते रूपापर्य्यन्ततया बोधिसत्त्वापर्य्यन्तता वेदितव्या। वेदनापर्य्यन्ततया बोधिसत्त्वापर्य्यन्तता वेदितव्या। संज्ञापर्य्यन्ततया बोधिसत्त्वापर्य्यन्तता वेदितव्या। संस्कारापर्य्यन्ततया बोधिसत्त्वापर्य्यन्तता वेदितव्या। विज्ञानपर्य्यन्ततया बोधिसत्त्वापर्य्यन्तता वेदितव्या। केन कारणेनायुष्मन् सुभूते रूपं बोधिसत्त्व इत्येवमपि न संविद्यते नोपलभ्यते। वेदना बोधिसत्त्व इत्येवमपि न संविद्यते नोपलभ्यते। संज्ञा बोधिसत्त्व इत्येवमपि न संविद्यते नोपलभ्यते। विज्ञानं बोधिसत्त्व इत्येवमपि न संविद्यते नोपलभ्यते। केन कारणेनायुष्मन् सुभूते एवं वदस्येवमहं सर्व्वेण सर्व्वं सर्व्वथा सर्व्वं बोधिसत्त्वमसमनुपश्यन्ननुपलभमानः कतमं बोधिसत्त्वं कतमस्यां प्रज्ञापारमितायामववदिष्यान्यनुशासिष्यामि। केन कारणेनायुष्मन् सुभूते एवं वदसि बोधिसत्त्वमेव तावत् सकलं न समनुपश्यामि नोपलभे। कतमं बोधिसत्त्वं कतमस्यां प्रज्ञापारमितायामववदिष्याम्यनुशासिष्यामि। केन कारणेनायुष्मन् सुभूते एवं वदसि बोधिसत्त्वो बोधिसत्त्व इति भगवन्नुच्यते। यावदेव नाममात्रमेतत्। केन कारणेनायुष्मन् सुभूते एवं वदसि यथा आत्मेत्युच्यते अत्यन्तानभिनिर्वृत्तस्यात्मा। एवमेव भगवन् बोधिसत्त्वो महासत्त्व इत्युच्यते अत्यन्तानभिनिर्वृत्तस्य बोधिसत्त्वः। एवमभाव स्वभावानां सर्व्वधर्म्माणां कतमत्तद्रूपं यदनभिनिर्वृत्तं। कतमा सा वेदना

याऽनभिनिर्वृत्ता। कतमा सा संज्ञा याऽनभिनिर्वृत्ता। कतमे ते संस्कारा येऽनभिनिर्वृत्ताः। कतमत् तद्विज्ञानं यदनभिनिर्वृत्तं। यदनभिनिर्वृत्तं न तद्रूपं। याऽनभिनिर्वृत्ता न सा वेदना। याऽनभिनिर्वृत्ता न सा संज्ञा। येऽनभिनिर्वृत्ता न ते संस्काराः। यदनभिनिर्वृत्तं न तद्विज्ञानं। केन कारणेन सुभूते एवं वदसि तत् किमनभिनिर्वृत्तमनभिनिर्वृत्तायां प्रज्ञापारमितायामववदिष्याम्यनुशासिष्यामि। केन कारणेन सुभूते एवं नाऽन्यत्रानभिनिर्वृत्तैर्बोधिसत्त्व उपलभ्यते यो बोधाय चरेत्। केन कारणेन सुभूते एवं वदसि स चेदेवं निर्दिश्यमाने बोधिसत्त्वस्य महासत्त्वस्य चित्तं नावलीयते न संलीयते न विप्रतिसारी भवति मानसं नोत्त्रस्यति न संत्रस्यति न संत्रासमापद्यते चरत्ययं बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायामिति। एवमुक्ते आयुष्मान् सुभूतिरायुष्मन्तं शारद्वतीपुत्रमेतदवोचत्। सत्त्वासत्तयायुष्मञ्छारद्वतीपुत्र पूर्वान्ततो बोधिसत्त्वो नोपैति। सत्त्वविविक्ततया पूर्वान्ततो बोधिसत्त्वो नोपैति। सत्त्वा स्वभावतयां पूर्वान्ततो बोधिसत्त्वो नोपैति। सत्त्वासत्त्वयाऽपरान्ततो बोधिसत्त्वो नोपैति। सत्त्वाशून्यतया सत्त्वविविक्ततया सत्त्वास्वभावतया अपरान्ततो बोधिसत्त्वो नोपैति। सत्त्वासत्तया मध्यतो बोधिसत्त्वो नोपैति। सत्त्वशून्यतया सत्त्वविविक्ततया सत्त्वास्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र सत्त्वासत्तयो सत्त्वशून्यतायां सत्त्वविविक्ततायां सत्त्वास्वभावतायां पूर्वान्त उपलभ्यते नापरान्तो न मध्य उपलभ्यते। न चान्यासत्त्वासत्ताऽन्यासत्त्वशून्यताऽन्यासत्त्व-

विविक्तताऽन्यासत्त्वास्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्यो-ऽपरान्तोऽन्यो मध्य इति ह्यायुष्मञ्छारद्वतीपुत्र या च सत्त्वासत्ता या च सत्त्वशून्यता या च सत्त्वविविक्तता या च सत्त्वस्वभावता यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं। रूपा-सत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वाऽन्ततो बोधिसत्त्वो नोपैति। रूप-शून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। रूपविविक्ततया पूर्व्वा-न्ततो बोधिसत्त्वो नोपैति। रूपाऽस्वभावतया पूर्व्वान्ततो बोधि-सत्त्वो नोपैति। रूपसत्त्वयाऽपरान्ततो बोधिसत्त्वो नोपैति। रूप-शून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। रूपविविक्ततयाऽपरा-न्ततो बोधिसत्त्वो नोपैति। रूपास्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। रूपासत्त्वया मध्यतो बोधिसत्त्वो नोपैति। रूपशून्यतया मध्यतो बोधिसत्त्वो नोपैति। रूपविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। रूपास्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र रूपासत्तयो रूपशून्यतायां रूप-विविक्ततायां रूपास्वभावतायां पूर्व्वान्त उपलभ्यते नापरान्त उप-लभ्यते न मध्य उपलभ्यते। न चान्यारूपासत्ताऽन्यारूपशून्यता-ऽन्यारूपविविक्तताऽन्यारूपास्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तो-ऽन्योऽपरान्तोऽन्येन मध्यं। इति ह्यायुष्मञ्छारद्वतीपुत्र या च रूपा-सत्ता या च रूपशून्यता या च रूपविविक्तता या च रूपास्वभा-वता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्व-मेतदद्वयमद्वैधीकारं।

वेदनासत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति।

वेदनाशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। वेदनाविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। वेदनाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। वेदनाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। वेदनाशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। वेदनाविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। वेदनाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। वेदनाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। वेदनाशून्यतया मध्यतो बोधिसत्त्वो नोपैति। वेदनाविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र वेदनाऽसत्तया वेदनाशून्यतायां वेदनाविविक्ततायां वेदनाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यं उपलभ्यते। न चाऽन्यावेदनासत्ताऽन्यावेदनाशून्यताऽन्यावेदनाविविक्तताऽन्यावेदनाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यं। इति ह्यायुष्माञ्छारद्वतीपुत्र या च वेदनाऽसत्ता या च वेदनाशून्यता या च वेदनाविविक्ततो या च वेदनाऽस्वभावतायश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो या च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं।

संज्ञाऽसत्तायायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संज्ञाशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संज्ञाविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संज्ञाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संज्ञासत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। संज्ञाशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। संज्ञाविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। संज्ञाऽस्वभावतयाऽपरान्ततो

बोधिसत्त्वो नोपैति। संज्ञाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। संज्ञाशून्यतया मध्यतो बोधिसत्त्वो नोपैति। संज्ञाविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। संज्ञाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र संज्ञाऽसत्तायां संज्ञाशून्यतायां संज्ञाविविक्ततायां संज्ञाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्य संज्ञाऽसत्ताऽन्या संज्ञाशून्यताऽन्या संज्ञाविविक्तताऽन्या संज्ञाऽस्वभावता। अन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्या मध्यं। इति ह्यायुष्मञ्छारद्वतीपुत्र या च संज्ञाऽसत्ता या च संज्ञाशून्यता या च संज्ञाविविक्तता या च संज्ञाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं।

संस्काराऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संस्कारशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संस्कारविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संस्काराऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संस्कारासत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। संस्कारशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। संस्कारविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। संस्काराऽस्वभावतयाऽपरान्ततो बोधिसत्त्वा नोपैति। संस्कारासत्तया मध्यतो बोधिसत्त्वो नोपैति। संस्कारशून्यतया मध्यतो बोधिसत्त्वो नोपैति। संस्कारविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। संस्काराऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र संस्काराऽसत्तायां संस्कारशून्य-

तायां संस्कारविविक्ततायां संस्काराखभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽप्या संस्काराऽसत्ताऽन्या संस्कारशून्यताऽन्या संस्कारविविक्तताऽन्या संस्काराऽखभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यं। इति ह्यायुष्मञ्छारद्वतीपुत्र। या च संस्कारासत्ता या च संस्कारशून्यता या च संस्कारविविक्तता या च संस्काराऽखभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं।

विज्ञानाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्तो बोधिसत्त्वो नोपैति। विज्ञानशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। विज्ञानविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। विज्ञानाखभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। विज्ञानासत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। विज्ञानशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। विज्ञानविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। विज्ञानाखभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। विज्ञानासत्तया मध्यतो बोधिसत्त्वो नोपैति। विज्ञानशून्यतया मध्यतो बोधिसत्त्वो नोपैति। विज्ञानविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। विज्ञानाऽखभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र विज्ञानासत्तायां विज्ञानशून्यतायां विज्ञानविविक्ततायां विज्ञानाखभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। पराऽन्या विज्ञानाऽसत्ताऽन्या विज्ञानशून्यताऽन्या विज्ञानविविक्तताऽन्या

विज्ञानाऽस्वभावतोऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यं । इति ह्यायुष्मञ्छारद्वतीपुत्र या च विज्ञानाऽसत्ता या च विज्ञानशून्यता या च विज्ञानविविक्तता या च विज्ञानाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं ।

चक्षुरसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । चक्षुःशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । चक्षुर्विविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । चक्षुरस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । चक्षुरसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । चक्षुःशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । चक्षुर्विविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । चक्षुरस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । चक्षुरसत्तया मध्यतो बोधिसत्त्वो नोपैति । चक्षुःशून्यतया मध्यतो बोधिसत्त्वो नोपैति । चक्षुर्विविक्ततया मध्यतो बोधिसत्त्वो नोपैति । चक्षुरस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र चक्षुरसत्तायां चक्षुःशून्यतायां चक्षुर्विविक्ततायां चक्षुरस्वभावतायां पूर्व्वान्त उपलभ्यते । नापरान्त उपलभ्यते । न मध्यमुपलभ्यते न चान्या चक्षुरसत्ताऽन्या चक्षुःशून्यताऽन्या चक्षुर्विविक्तताऽन्या चक्षुरस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यं । इति ह्यायुष्मञ्छारद्वतीपुत्र या च चक्षुरसत्ता या च चक्षुःशून्यता या च चक्षुर्विविक्तता या च चक्षुरस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं ।

श्रोत्रासत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। श्रोत्रशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। श्रोत्रविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। श्रोत्रास्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। श्रोत्रासत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। श्रोत्रशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। श्रोत्रविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। श्रोत्रास्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। श्रोत्रासत्तया मध्यतो बोधिसत्त्वो नोपैति। श्रोत्रशून्यतया मध्यतो बोधिसत्त्वो नोपैति। श्रोत्रविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। श्रोत्रास्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र श्रोत्रासत्तायां श्रोत्रशून्यतायां श्रोत्रविविक्ततायां श्रोत्रस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चान्या श्रोत्रासत्ताऽन्या श्रोत्रशून्यताऽन्या श्रोत्रविविक्तताऽन्या श्रोत्रास्वभावताऽन्यो बोधिसत्त्वोऽन्योऽपरान्तोऽन्यन्मध्यं। इति ह्यायुष्मञ्छारद्वतीपुत्र या च श्रोत्रासत्ता या च श्रोत्रशून्यता या च श्रोत्रविविक्तता या च श्रोत्रास्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं।

घ्राणासत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। घ्राणशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। घ्राणविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। घ्राणास्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। घ्राणासत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। घ्राणशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। घ्राणविविक्ततयाऽ-

परान्ततो बोधिसत्त्वो नोपैति । घ्राणास्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । घ्राणासत्तया मध्यतो बोधिसत्त्वो नोपैति । घ्राणशून्यतया मध्यतो बोधिसत्त्वो नोपैति । घ्राणविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । घ्राणाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र घ्राणासत्तायां घ्राणशून्यतायां घ्राणविविक्ततायां घ्राणास्वभावतायां पूर्व्वान्त उपलभ्यते । नापरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चान्या घ्राणासत्ताऽन्या घ्राणशून्यताऽन्या घ्राणविविक्तताऽन्या घ्राणास्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्याऽपरान्तोऽन्यन्मध्यं । इति ह्यायुष्मञ्छारद्वतीपुत्र या च घ्राणासत्ता या च घ्राणशून्यता या च घ्राणविविक्तता या च घ्राणास्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं ।

जिह्वासत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । जिह्वाशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । जिह्वाविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । जिह्वाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । जिह्वासत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । जिह्वाशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । जिह्वाविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । जिह्वाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । जिह्वाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । जिह्वाशून्यतया मध्यतो बोधिसत्त्वो नोपैति । जिह्वाविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । जिह्वाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र जिह्वाऽ-

सत्तायां जिह्वाशून्यतायां जिह्वाविविक्ततायां जिह्वाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चान्या जिह्वाऽसत्ताऽन्या जिह्वाशून्यताऽन्या जिह्वाविविक्तताऽन्या जिह्वाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यं। इति ह्यायुष्मञ्छारद्वतीपुत्र या च जिह्वाऽसत्ता या च जिह्वाशून्यता या च जिह्वाविविक्तता या च जिह्वाऽस्वभावता यश्च बोधिसत्त्वो यश्च पुर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं।

कायाऽसत्तयायुष्मञ्छारद्वतीपुत्र पुर्व्वान्ततो बोधिसत्त्वो नोपैति। कायशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। कायविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। कायाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। कायाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। कायशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। कायविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। कायाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। कायाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। कायशून्यतया मध्यतो बोधिसत्त्वो नोपैति। कायविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। कायास्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र कायाऽसत्तायां कायशून्यतायां कायविविक्ततायां कायाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चान्या कायाऽसत्ताऽन्या कायशून्यताऽन्या कायविविक्तताऽन्या कायस्वभावताऽन्यो बोधिसत्त्वोऽन्य पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यं। इति

ह्यायुष्मञ्छारद्वतीपुत्र या च कायासत्ता या च कायशून्यता या च कायविविक्तता या च कायस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं ।

मनोऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। मनःशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । मनोविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । मनोऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । मनोऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । मनःशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । मनोविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । मनोऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । मनोऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । मनःशून्यतया मध्यतो बोधिसत्त्वो नोपैति । मनोविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । मनोऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र मनोऽसत्तायां मनःशून्यतायां मनोविविक्ततायां मनोऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नापरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या मनोऽसत्ताऽन्या मनःशून्यताऽन्या मनोविविक्तताऽन्या मनोऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्ततोऽन्योऽपरान्तोऽन्यन्मध्यं। इति ह्यायुष्मञ्छारद्वतीपुत्र या च मनोऽसत्ता या च मनःशून्यता या च मनोविविक्तता या च मनोऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधिकारं ।

रूपासत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। रूपशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । रूपाविविक्ततया

पूर्व्वान्ततो बोधिसत्त्वो नोपैति। रूपास्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। रूपाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। रूपशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। रूपविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। रूपास्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। रूपासत्तया मध्यतो बोधिसत्त्वो नोपैति। रूपशून्यतया मध्यतो बोधिसत्त्वो नोपैति। रूपविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। रूपास्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र रूपासत्तायां रूपशून्यतायां रूपविविक्ततायां रूपास्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या रूपाऽसत्ताऽन्या रूपशून्यताऽन्या रूपविविक्तताऽन्या रूपास्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यं। इति ह्यायुष्मञ्छारद्वतीपुत्र या च रूपासत्ता या च रूपशून्यता या च रूपविविक्तता या च रूपास्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं।

शब्दासत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। शब्दशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। शब्दविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। शब्दास्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। शब्दाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। शब्दशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। शब्दविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। शब्दास्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। शब्दासत्तया मध्यतो बोधिसत्त्वो

नोपैति। शब्दशून्यतया मध्यतो बोधिसत्त्वो नोपैति। शब्द-विविक्ततया मध्यतो बोधिसत्त्वो नोपैति। शब्दास्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र शब्दासत्तायां शब्दशून्यतायां शब्दविविक्ततायां शब्दास्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या शब्दाऽसत्ताऽन्या शब्दशून्यताऽन्या शब्दविविक्तताऽन्या शब्दाऽस्वभावतान्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यं। इति ह्यायुष्मञ्छारद्वतीपुत्र या च शब्दाऽसत्ता या च शब्द-शून्यता या च शब्दविविक्तता या च शब्दास्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वय-मद्वैधीकारं।

गन्धासत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। गन्धशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। गन्धविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। गन्धास्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। गन्धासत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। गन्धशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। गन्धविविक्ततयाऽप-रान्ततो बोधिसत्त्वो नोपैति। गन्धस्वभावतयाऽपरान्ततो बोधि-सत्त्वो नोपैति। गन्धासत्तया मध्यतो बोधिसत्त्वो नोपैति। गन्धशून्यतया मध्यतो बोधिसत्त्वो नोपैति। गन्धविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। गन्धास्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र गन्धासत्तायां गन्धशून्यतायां गन्धविविक्ततायां गन्धास्वभावतायां पूर्व्वान्त

उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चा
ऽन्यागन्धासत्त्वाऽन्यागन्धशून्यताऽन्यागन्धविविक्तताऽन्यागन्धस्वभावता।
अन्या बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्यो परान्तोऽन्यन्मध्यं। इति ह्यायु-
ष्मञ्छारद्वतीपुत्र या च गन्धासत्ता या च गन्धशून्यता या च
गन्धविविक्तता या च गन्धास्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो
यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकार।

रसासत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति।
रसशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। रसविविक्ततया
पूर्व्वान्ततो बोधिसत्त्वो नोपैति। रसास्वभावतया पूर्व्वान्ततो नोपैति।
रसास्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। रसासत्तया-
ऽपरान्ततो बोधिसत्त्वो नोपैति। रसशून्यतयाऽपरान्ततो बोधिसत्त्वो
नोपैति। रसविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। रसा-
स्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। रससत्तया मध्यतो
बोधिसत्त्वो नोपैति। रसशून्यतया मध्यतो बोधिसत्त्वो नोपैति।
रसविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। रसास्वभावतया
मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र
रसासत्तायां रसशून्यतायां रसविविक्ततायां रसास्वभावतायां
पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते।
न चान्यारसासत्ताऽन्यारसशून्यताऽन्यारसविविक्तताऽन्यारसास्वभावता
ऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यंमध्यं इति ह्यायु-
ष्मञ्छारद्वतीपुत्र या च रसासत्ता या च रसशून्यता या च रस-
विविक्तता या च रसास्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो
यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं।

